M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Bar. 548

Title: Shanta Bodha

548

श्रुतबोधः

Shruta Bodha	Title
Kali dāsa	Author
	Editor
	Year, Vols.
	Publisher
548	Remarks

५९७ 548

श्रीगणेशायनमः॥ छंदसांलक्षणंयेनश्रुतमात्रेणबुध्यते॥ तमहंकथयिष्यामिश्रुतबोधमविस्तरं॥
॥१॥ संयुक्ताद्यंदीर्घंसानुस्वारंविसर्गसंमिश्रं॥ विज्ञेयमक्षरंगुरुपादांतस्थंविकल्पेन॥२॥ यस्याः
पादेप्रथमेद्वादशमात्रास्तथातृतीयेपि॥ अष्टादशद्वितीयेचतुर्थकेपंचदशसार्या॥३॥ आर्या
पूर्वार्द्धसमंद्वितीयमपिभवतियत्रहंसगते॥ छंदोविदस्तदानींगीतिंताममृतवाणिभाषंते॥
॥४॥ आर्योत्तरार्द्धतुल्यंप्रथमार्द्धमपिप्रयुक्तंचेत्॥ कामिनितामुपगीतिंप्रकाशयंतेमहाक
द८ वयः॥५॥ आद्यंचतुर्थंपंचमकंचेत्॥ यत्रगुरुस्यात्साक्षरपंक्तिः॥६॥ अगुरुरचनुफलेवतिगुरुद्वौ॥
घनकुचयुग्मेशशिवदनासा॥७॥ तुर्यंपंचमकंचेद्यत्रस्याल्लघुबाले॥ विद्वद्भिर्गगनेत्रेप्रोक्तासा
मदलेखा॥८॥ श्लोकेषष्ठंगुरुज्ञेयंसर्वत्रलघुपंचमं॥ द्विचतुःपादयोर्ह्रस्वंसप्तमंदीर्घमन्ययोः॥
॥९॥ आदिगतंतुर्यगतंपंचमकंचांत्यगतं॥ स्याद्गुरुचेत्तत्कथितंमाणवकक्रीडमिदं॥१०॥ द्वितुर्य
षष्ठमष्टमंगुरुप्रयोजितंयदा॥ तदानिवेदयंतितांबुधानगस्वरूपिणी॥११॥ सर्ववर्णादीर्घा
यस्यांविश्रामस्याद्वेदैर्वेदैः॥ विद्वद्वृंदैर्वीणावाणिव्याख्यातासाविद्युन्माला॥१२॥ तन्वि

गुरुस्यादाद्यंचतुर्थंपंचमषष्ठंचांत्यमुपांत्यं।इंद्रियबाणैर्यत्रविरामःसाकथनीयाचंपकमाला॥
॥१३॥चंपकमालायत्रभवेदंत्यविहीनाप्रेमनिधे।छंदसिदक्षायेकवयस्तन्मणिबंधंनब्रुवते॥१४॥
चत्वारःप्राक्सुतनुगुरवोद्वौदशैकादशौचेन्मुग्धेवर्णौतदनुकुमुदामोदिनिद्वादशांत्यौ।तद्वच्छ्रो
त्रोयुगरसहयैर्यत्रकांतेविरामोमंदाक्रांतांप्रवरकवयस्तन्विनांसंगिरंत॥१५॥मंदाक्रांता
स्यांतिरहितासालंकारेभवतियदिसा॥तद्विद्वाद्रिश्चैवमभिहिताज्ञेयाहंसीकमलवदने॥१६
॥ह्रस्वोवर्णोजायतेयत्रषष्ठःकंबुग्रीवेतद्वद्वाष्टमंत्यः॥विश्रामःस्यात्तन्विवेदैस्तुरंगैस्तांजानंते
शालिनींछंदसीयाः॥१७॥आद्यचतुर्थमहीननितंबेसप्तमकंदशमंचतथांत्यं।यत्रगुरुः
प्रकटस्मरसारेतत्कथितंबतदोधकवृत्तं॥१८॥यस्यांत्रिषट्सप्तममक्षरंस्याद्ध्रस्वंसुजंघेनवमं १
चतद्वत्।गत्याविलक्षीकृतहंसकांतेतामिंद्रवज्रांब्रुवतेमुनींद्राः॥१९॥यदींद्रवज्राचरणेषुपू
र्वेभवंतिवर्णालघवःसुवर्णे॥अमंदमाद्यन्मदनेनदांतेमुपेंद्रवज्राकथितामुनींद्रैः॥२०॥यत्र
द्वयोरप्यनयोस्तुपादाभवंतिसीमंतिनिचंद्रकांते।विद्वद्भिराद्यैःपरिकीर्तितासात्रयुज्यतानि

स्युपजातिरेषा॥२१॥आख्यानकीस्यात्सकदीहनास्येयदींद्रवज्राचरणःपुरःस्यात्।उपेंद्रवज्रा
चरणास्त्रयोन्येविपर्ययोक्ताविपरीतपूर्वा॥२२॥आद्यमक्षरमतस्तृतीयकंसप्तमंचनवमंत
थांतिमं।दीर्घमिंदुमुखियत्रजायतेतांवदंतिकवयोरथोद्धतां॥२३॥अक्षरंचनवमंदशमंचव्य
त्ययाद्भवतियत्रविनीते।आद्यमेणनयनेयदिसैवस्वागतेतिकथिताहिकवींद्रैः॥२४॥ह्रस्वो
वर्णःस्यात्सप्तमोयत्रबालेद्वौविष्टिव्यस्तरैकादशाद्यः॥बाणैर्विश्रामोनंतरंस्याच्चतुरंगैर्ना
म्नानिर्दिष्टासुभ्रुसावैरवदेवी॥२५॥सतृतीयकषष्ठमनंतरतोतेनवमंविरतिप्रभवंगुरुचे
त्।घनपीनपयोधरभारनतेननुतोटकवृत्तमिदंकथितं॥२६॥हिइहतोटकस्यगुरुपंचम
कंविहितंविलासिनितथाक्षरकं।रसमरव्यकंगुरुनंदवलेप्रमिताक्षरेतिकविभिःकथि
ता॥२७॥यदाद्यंचतुर्थंतथासप्तमंचेत्तथाचाक्षरंह्रस्वमेकादशाद्यं।शरच्चंद्रविद्वेषिवक्त्रार
विंदेतदुक्तंकवींद्रैर्भुजंगप्रयातं॥२८॥अयिकृशोदरियत्रचतुर्थकंगुरुरसप्तमकंदशमंत
था॥विरतिजंघनपर्वविचक्षणेद्रुतविलंबितमित्यपदिश्यते॥२९॥प्रथमाक्षरमाद्यंत

तीययोर्द्रुतविलंबितकस्य च पादयोः ॥ अयि निनंतदा कमले क्षणे भवति सुंदरि सा हरिणीप्लुता ॥
३०॥ उपेंद्रवज्रा चरणेषु संति चेदुपांत्यवर्णा लघवो परं कृताः ॥ मदोल्लसत्कुंजरकामकामुके
वदंति वंशस्थमिदं बुधास्तदा ॥ ३१॥ यस्यामशोकांकुरपाणिपल्लवगंभ्रपादा गुरुरुप वर्ण
काः ॥ तारुण्यलीलारतिरंगलालसे तामिंद्रवंशां कवयः प्रचक्षते ॥ ३२॥ यस्यां प्रिये प्रथमकम
क्षरद्वयं तुर्यं तथा गुरु नवमं द्वांतिमं ॥ शांत्यं भवेद्यतिरपि च युगग्रहैः सा कंबुकंठि निगदिता
प्रभावती ॥ ३३॥ आद्ये द्वितीयमथ पंचमं च वान्त्यं तथोपांत्यं गुरु विरतौ सुभाषितं स्यात् ॥ वि
श्रामो भवति महेशनेत्रदिग्भिर्विज्ञेया ननु सुदति प्रहर्षिणी सा ॥ ३४॥ आद्यं द्वितीयमपि
चेद्गुरु तच्चतुर्थं यत्राष्टमं च दशमांत्यमुपांत्यमंत्यं ॥ कामांकुशांकुशितकाममतंगजेंद्रकां
ते वसंततिलकां किल तां वदंति ॥ ३५॥ प्रथममगुरुषट्कं विद्यते यत्र कांते तदनु च दशमं
चेदक्षरं द्वादशांत्ये ॥ करिशिरथतुरंगैर्यत्र कांते विरामः सुकविजनमनोज्ञा मालिनी सा २
प्रसिद्धा ॥ ३६॥ सुमुखि लघवः पंच प्राच्याः स्तनौ दशमांतिमं तदनु ललितालापे वर्णो

प्रियेत्र चतुर्दशौ ॥ भवति पुनर्यत्रोपांत्यः स्फुरत्कर कंकणे यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणी
तिसा ॥ ३७॥ यदाद्याव्योङ्कस्वः कलितकनके षष्ठकपरास्ततो वर्णाः पंच प्रकृतिसुकुमारांग
लितिलके ॥ त्रयान्ये सोपांत्यानु सुतनुजघनाभोगसुभरे रसैरीशैर्यस्यां भवति विरतिः सा शि
खरिणी ॥ ३८॥ द्वितीयमलिकुंतले यदि षडष्टमं द्वादशं चतुर्दशमथ प्रिये गुरु गभीरना
भीह्रदे ॥ सपंचदशषोडशं मांतिमं तदनु यत्र कांते यतिर्गिरींद्रफणभृत्कुलैर्भवति सुभ्रु पृथ्वी
तिसा ॥ ३९॥ चत्वारः प्राक्सुतनु गुरवो द्वौ दशैकादशौ चेन्मुग्धे वर्णौ तदनु कुमुदामोदि
निह्लादनांत्यौ ॥ तद्वत्त्वांत्यौ युगरसहयैर्यत्र कांते विरामो मंदाक्रांतां प्रवरकवयस्तन्वि तां
संगिरंते ॥ ४०॥ आद्यांश्चेत्कुरवस्त्रयः प्रियतमे षष्ठस्ततश्चाष्टमस्तन्व्येकादशतस्त्रयस्तद
नु चेदष्टादशांत्योत्ततः ॥ मार्तंडैर्मुनिभिश्च यत्र विरतिः पूर्णेंदुबिंबानने तद्वृत्तं प्रवदंति काव्यरसि
काः शार्दूलविक्रीडितं ॥ ४१॥ चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोपि द्वौ तावत्वो

ड्नाद्यैम्मृगमदमुदितैर्षोडशांत्यैतथांस्यै ॥ रंभास्तंभोरुकांते मुनिमुनिमुनिभिर्यत्रकांते
विरामोबालेवेद्यैःकवींद्रैःसुतनुनिगदितास्रग्धरासाप्रसिद्धा ॥४२॥ ॥ इतिश्रीकविमं
डलीमंडनकालिदासप्रणीतःश्रुतबोधःसमाप्तः ॥ श्रीगुरवेनमः ॥ ॥ रामायनमः ॥